**ME 908**

Sl. No.

# SSLC MODEL EXAMINATION, MARCH - 2021

## SANSKRIT

First Language - (Academic & Oriental) Paper - I

Time : 1½ Hours | Total Score : 40

निर्देशाः -

- आदौ 20 निमेषाः समाश्वाससमयः। प्रश्नान् पठितुं, इच्छानुसारं चेतुम्, उत्तराणि क्रमीकर्तुं च समयोऽयं उपयोक्तव्यः।
- प्रश्नस्य निर्देशान् सश्रद्धं पठित्वा, अवगत्य च उत्तराणि लेखनीयानि।
- प्रश्नानाम् अङ्काः तत्र तत्र दत्ताः। उत्तरलेखनाय समयः अङ्काः च परिगणनीयाः।
- 1 - 31 प्रश्नेभ्यः 40 अङ्कलाभाय यथेच्छं कस्यापि प्रश्नस्य उत्तरलेखनाय अवसरः अस्ति।

**നിർദ്ദേശങ്ങൾ :**

- ആദ്യത്തെ 20 മിനിറ്റ് സമാശ്വാസസമയമാണ്. ഈ സമയം ചോദ്യങ്ങൾ വായിക്കുന്നതിനും, ഇഷ്ടമുള്ള ചോദ്യങ്ങൾ തെരഞ്ഞെടുക്കുന്നതിനും, ഉത്തരങ്ങൾ ആസൂത്രണം ചെയ്യുന്നതിനും ഉപയോഗിക്കേണ്ടതാണ്.
- ഓരോ ചോദ്യവുമായി ബന്ധപ്പെട്ട നിർദ്ദേശങ്ങൾ ശ്രദ്ധാപൂർവ്വം വായിച്ച് മനസ്സിലാക്കിയശേഷം ഉത്തരമെഴുതേണ്ടതാണ്.
- ഓരോ ചോദ്യത്തിനുമുള്ള സ്കോർ അതോടൊപ്പം നൽകിയിരിക്കുന്നു. ഉത്തരം എഴുതുമ്പോൾ സമയവും സ്കോറും പരിഗണിക്കേണ്ടതാണ്.
- 1 മുതൽ 31 വരെയുള്ള ചോദ്യങ്ങളിൽ നിന്നും 40 സ്കോർ ലഭിക്കത്തക്ക വിധം ഇഷ്ടമുള്ള ഏതു ചോദ്യങ്ങൾക്കും ഉത്തരമെഴുതാവുന്നതാണ്.

---

Score

1 → 8 प्रत्येकं प्रश्नस्य **एकैकः** अङ्कः।

(1 → 8 - ഓരോ ചോദ്യത്തിനും ഒരു സ്കോർ വീതം ആണ്)

कोष्टकात् समुचितम् उत्तरं चित्वा लिखत।

1. धनानाम् उत्तमं किम् ? (श्रुतम्, सुखम्, दुःखम्, दानम्) 1

P.T.O.

Score

2. दशपुत्रसमः कः ? (पुत्रः, वापी, द्रुमः, कूपः) 1

3. किं गणे नान्तर्भवति ? (आम्रः, नारिकेलः, पूगः, पनसः) 1

4. अद्वैततत्वप्रतिष्ठापकः कः ? (व्यासः, श्रीशङ्करः, रामानुजः, गौतमः) 1

5. 'भैक्ष्यम्' इत्यस्य समानपदं किम् ? (भिक्षा, पूजा, दया, आशा) 1

6. प्रशस्तः केरलीयसङ्गीतज्ञः कः ? (त्यागराजस्वामी, मुत्तुस्वामिदीक्षितः, पुरन्दरदासः, षट्कालगोविन्दमारार्) 1

7. शकुन्तलायाः सखी का ? (गौतमी, मेनका, अनसूया, उर्वशी) 1

8. गिरिप्रभाषणं कस्मिन् ग्रन्थे दृश्यते ? (नवभारते, क्रिस्तुभागवते, केरलोदये, विशाखविजये) 1

9 → 17 प्रत्येकं प्रश्नस्य द्वौ अङ्कौ।

(9 → 17 ഓരോ ചോദ്യത്തിനും രണ്ട് സ്കോർ വീതമാണ്)

9. "वैरयुक्तेन सेव्यमानं भक्षणं न दहते।" इत्याशयप्रतिपादकं श्लोकं चित्वा लिखत। 2

(क) ईर्ष्याभयक्रोधसमन्वितेन लुब्धेन रुग्दैन्यनिपीडितेन।
विद्वेषयुक्तेन च सेव्यमानम् अन्नं न सम्यक् परिपाकमेति।।

(ख) शनैरर्थः शनैः पन्थाः शनैः पर्वतमारुहेत्।
शनैर्विद्या च धर्मश्च व्यायामश्च शनैः शनैः।।

10. उदाहरणानुसारं पट्टिकां लिखत। 2

(भाषमाणः, पचन्, सेवमानः, लिखन्)

| | शत्रन्तः | शानजन्तः |
|---|---|---|
| उदा → | लिखन् | भाषमाणः |
| | ------ | ------ |

Score

11. उदाहरणानुसारं वाक्यं परिवर्तयत। 2

उदा → पितामहः सम्पूर्णमौषधम् अपिबत्। रोगशमनं नाभवत्।

**यद्यपि** पितामहः सम्पूर्णमौषधम् अपिबत् **तथापि** रोगशमनं नाभवत्।

सूर्यः उदयति। प्रकाशः न व्याप्नोति।

---------------- ।

12. श्लोकं पठित्वा उचितम् आशयं चित्वा लिखत। 2

आत्मानमेव मन्येत कर्तारं सुखदुःखयोः।
तस्माच्छ्रेयस्करं मार्गं प्रतिपद्येत न त्रसेत्।।

(क) सुखेषु तृप्तिः श्रेष्ठा भवति।

(ख) व्यायामस्य अनुष्ठानेन स्वस्थः भवति।

(ग) सुखस्य दुःखस्य च कारणं स्वकर्म एव भवति।

13. कोष्ठकात् उचितमुत्तरं चित्वा योजयत। 2

(वृक्षः, वीरुत्)

व्यक्तपुष्पः - ____________।

प्रतानैः प्रसारिता - ____________।

14. श्लोकं पठित्वा गद्यक्रमं लिखत। 2

अमुना वचनेन तोषिता
कमला तद्भवनं समन्ततः।
कनकामलकैरपूरय-
ज्जनताया हृदयं च विस्मयैः।।

गद्यक्रमः → अमुना ..... तोषिता ..... तद्भवनं समन्ततः ..... अपूरयत्। विस्मयैः ..... हृदयं च अपूरयत्।

15. उदाहरणानुसारं पट्टिकां लिखत। 2

(कठम्, साम, अथर्वः, माण्डूक्यम्)

| | वेदः | उपनिषद् |
|---|---|---|
| उदा → | अथर्वः | माण्डूक्यम् |
| | ------ | ------ |

Score

16. उदाहरणानुसारं लिखत। 2

उदा → धनहीनः → धनेन हीनः।

(क) मानहीनः → ............ ।

उदा → राष्ट्रस्य पतिः → राष्ट्रपतिः।

(ख) राष्ट्रस्य पिता → ............ ।

17. उदाहरणानुसारं लिखत। 2

उदा → केयम् → का + इयम्।

(क) सेयम् → ...... + ...... ।

उदा → तेन + एव → तेनैव।

(ख) अनेन + एव → .......... ।

18 → 21 प्रत्येकं प्रश्नस्य **त्रयः** अङ्काः।

(18 → 21 ഓരോ ചോദ്യത്തിനും മൂന്നു സ്കോർ വീതമാണ്)

18. उदाहरणानुसारं कोष्ठकात् उचितमुत्तरं चित्वा पट्टिकां लिखत। 3

| | वृक्षः | वनस्पतिः | ओषधिः |
|---|---|---|---|
| उदा → | पूगः | अश्वत्थः | कदली |
| | आम्रः | – – – – – | गोधूमः |
| | – – – – – | पनसः | – – – – – |

| |
|---|
| आम्रः, गोधूमः |
| पनसः, कदली |
| उदुम्बरः, पूगः |
| व्रीहिः, अश्वत्थः |
| नालिकेरः |

19. अधोदत्तं वाक्यं पठित्वा क्त्वान्त-ल्यबन्त-तुमुन्नन्तपदानि चित्वा लिखत। 3

ब्राह्मणपत्नीं दृष्ट्वा तस्याः दारिद्र्यं विज्ञाय शङ्करः कमलां प्रार्थयितुम् आरभते।

Score

20. उदाहरणानुसारं कोष्ठकात् उचितमुत्तरं चित्वा पट्टिकां लिखत। 3

(अवदत्, लिखति, पठतु, अलिखत्, वदतु, अपठत्, लिखतु, पठति, वदति)

| | लट् | लङ् | लोट् |
|---|---|---|---|
| उदा → | पठति | अपठत् | पठतु |
| | ------ | अलिखत् | ------ |
| | वदति | ------ | वदतु |

21. कोष्ठकात् समानार्थकपदानि चित्वा लिखत। 3

वृषभः - ------ ।

वासवः - ------ ।

कृषकः - ------ ।

| |
|---|
| कृषीवलः |
| इन्द्रः |
| बलीवर्दः |

**22 → 29 प्रत्येकं प्रश्नस्य चत्वारः अङ्काः।**

**(22 → 29 ഓരോ ചോദ്യത്തിനും നാല് സ്കോർ വീതമാണ്)**

22. खण्डिकां पठित्वा प्रश्नानाम् उत्तराणि लिखत। 4

केरलेषु विख्यातः दार्शनिको भवति शङ्कराचार्यः। सः एरणाकुलं जिल्लायां कालटीदेशे भूजातः। तस्य जीवनमधिकृत्य रचितं काव्यं भवति शङ्करदिग्विजयम्। तस्य कर्ता माधवविद्यारण्यस्वामी भवति। एतत् काव्यं महाकाव्यविभागे अन्तर्भवति।

(क) शङ्करस्य जन्मदेशः कः ?

(ख) "दार्शनिको भव" इत्यस्य पदच्छेदः किम् ?

(ग) शङ्करदिग्विजयस्य कर्ता कः ?

(घ) 'प्रसिद्धः' इत्यर्थे विद्यमानं पदं किम् ?

23. यथोचितं योजयत। 4

वृक्षायुर्वेदः - वनपर्व।

वीरूत् - अपत्यम्।

महाभारतम् - सुरपालः।

पुत्रः - कर्कटी।

Score

4

24. सूचनानुसारं जीवनचरितं लिखत।

नाम - डो सर्वेप्पल्ली राधाकृष्णः।

जन्म - 1888 सेप्तम्बर् 5, तिरूत्तणि, तमिल्नाडु।

पितरौ - एस् वीरस्वामी, सीतम्मा।

प्रशस्तिः - भारतस्य राष्ट्रपतिः, दार्शनिकः।

मृत्युः - 1975 एप्रिल् 17 ।

4

25. सूचनानुसारं वृक्षप्रभेदमधिकृत्य लघूपन्यासं लिखत।

सूचनाः → दशपुत्रसमः - वनस्पतिः - ओषधिः - चतुर्धा - अव्यक्तपुष्पः - पनसः - व्रीहिः।

4

26. श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत।

परिश्रमो मिताहारो भूगतावश्विनीसुतौ।
तावनादृत्य नैवाहं वैद्यमन्यं समाश्रये।।

(क) भूगतौ अश्विनीसुतौ कौ ?

(ख) कं न समाश्रये ?

(ग) 'तावनादृत्य' इत्यस्य पदच्छेदः किम् ?

(घ) श्लोकात् क्रियापदं चित्वा लिखत।

4

27. उदाहरणानुसारं पट्टिकां लिखत।

| | कर्ता | कृतिः | स्त्रीकथापात्रः |
|---|---|---|---|
| उदा → | कालिदासः | कुमारसम्भवम् | पार्वती |
| | माघः | ----- | भटपत्नी |
| | ----- | रघुवंशम् | सीता |
| | श्रीहर्षः | नैषधीयचरितम् | ----- |
| | भारविः | ----- | पाञ्चाली |

Score

28. अधोदत्तां घटनां पठित्वा सम्भाषणांशान् पूरयत। 4

एकदा केदारे क्षीणितं वृषभं कश्चन कर्षकः ताडयति। तत् दृष्ट्वा सर्वधेनूनां माता सुरभिः रोदिति। वासवः कारणं पृच्छति। ''मम बहवः पुत्राः सन्ति तथापि दुर्बले पुत्रे मातुः अधिकवात्सल्यं सहजमेव'' इति सुरभिः प्रत्यवदत्।

वासवः – हे सुरभे! किमर्थं रोदिषि ?

सुरभिः – हे ______ ! मम पुत्रस्य दैन्यतां दृष्ट्वा रोदिमि।

वासवः – पुत्रस्य किमभवत् ?

सुरभिः – ______ तं ताडयति।

वासवः – भवत्याः बहवः ______ सन्ति किल।

कुतो अस्मिन् एतादृशं वात्सल्यम् ?

सुरभिः – भो वासव! दुर्बले पुत्रे मातुः ______ सहजमेव।

29. सूचनानुसारं वृक्षायुर्वेदमधिकृत्य लघूपन्यासं लिखत। 4

सूचनाः – वेदाः – प्राग्रूपं – महाभारतम् – सस्यविज्ञानं – वृक्षायुर्वेदः – त्रयोदशाध्यायः – भूमिनिरूपणं – सस्यानां पोषणम्।

**30 → 31 प्रत्येकं प्रश्नस्य पञ्च अङ्काः।**

**(30 → 31 ഓരോ ചോദ്യത്തിനും അഞ്ച് സ്കോർ വീതമാണ്)**

30. प्रादेशिकभाषायां विवर्तयत। 5

कालिदासेन विरचितं महाकाव्यं भवति रघुवंशम्। सूर्यवंशराजानां चरितमेव अस्य काव्यस्य प्रमेयः। अस्मिन् काव्ये नवदश सर्गाः सन्ति। अस्य चतुर्दशे सर्गे सीतापरित्यागः एव कथावस्तु। रामः जनापवादभयेन सीतां परित्यक्तवान्।

31. प्रादेशिकभाषायां विवर्तयत। 5

कदाचित् शङ्करः भिक्षार्थम् अटन् आसीत्। तदा एकस्य ब्राह्मणकुटुम्बस्य दारिद्र्यं दृष्ट्वा तन्निवारणाय शङ्करः लक्ष्मीदेवीं प्रार्थयत। प्रार्थनां श्रुत्वा लक्ष्मीदेवी ब्राह्मणकुटुम्बस्य गृहं परितः कनकामलकैः अपूरयत्। तद् दृष्ट्वा जनाः विस्मिताः अभवन्।

-oOo-